# संस्कृत वार्ता:

दिनाङ्क : 02/07/2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- प्रधानमन्त्री नरेन्द्रमोदी नवदिल्ल्यां जापानी-समकक्षेण प्रधानमन्त्रिणा साने ताकाइची इत्यनया सह वार्षिक-शिखर-स्तरीयां मन्त्रणां विहितवान्। उभाभ्यामपि देशाभ्यां आर्थिकसुरक्षा-ऊर्जासुरक्षा-औषध- कृत्रिम-बुद्धिमत्तादिषु क्षेत्रेषु अनेके सन्धयः हस्ताक्षरिताः।
- प्रधानमन्त्री नरेन्द्रमोदी प्रावोचत् यत्, भारत-जापानयोः पारस्परिक-सम्बन्धेन समयस्य प्रत्येका परीक्षा समुत्तीर्णा।
- संयुक्तराष्ट्र-महासभायाम् अन्ताराष्ट्रिय-आतंकवादं विरुध्य व्यापक-अभिसमयस्य कृते भारतस्य कश्चन चिरलम्बित-प्रस्तावः समर्थितः ।
- जम्मू-नगरस्य भगवती-नगर-आधार-शिविरात् तीर्थयात्रिणाम् प्रथमस्य दलस्य प्रस्थानेन सह श्रीअमरनाथ-यात्रा विधिवत् समारब्धा।
- दक्षिण-पश्चिम-प्रावृट्कालः अद्य समग्र-दिल्ली-क्षेत्रं संप्राप्तः, तथा च अयं उत्तर-पश्चिम-राज्यानां केषुचित् भागेषु अपि अग्रे सरति।
- फीफा-विश्वचषके संयुक्त-राज्य-अमेरिकादेशेन द्व्यधिक-द्विसहस्रतमात् परं प्रथमः नॉकआउट-स्तरीय-विजयः समङ्कितः।

---------------------------------------------------

<u>प्रधानमन्त्री-जापानयात्रा</u>

भारतेन जापानेन चाद्य आर्थिक-ऊर्जा-सुरक्षा, औषध-रक्षा-कृत्रिम-बुद्धिमत्तादिषु विभिन्न-क्षेत्रेषु अनेके प्रमुख-सन्धयः परस्परं विनिमयीकृताः। प्रधानमन्त्री नरेन्द्रमोदी अद्य अपराह्णे नवदिल्ल्यां स्वस्य जापानी-समकक्षया प्रधानमन्त्रिणा साने ताकाइची इत्यनया सह वार्षिक-शिखर-स्तरीयाम् वार्ताम् साधितवान् । द्विपक्षीय-वार्तानन्तरं संयुक्तं संवाददातृ-सम्मेलनं सम्बोधयन् प्रधानमन्त्री मोदी प्रावोचत् यत्, वर्तमान-समये पारस्परिक-विश्वासः सम्पत्तिः वर्तते

, सहैव भारत-जापान-सम्बन्धेन समयस्य प्रत्येका परीक्षा उत्तीर्णा। तेन रेखाङ्कितं यत्, उभावपि देशौ विश्वस्य विशाल-अर्थव्यवस्थासु अन्यतमौ स्तः ।

प्रधानमन्त्रिणा सबलं प्रोक्तं यत्, उभावपि देशौ आर्थिक-सुरक्षायाः ऊर्जा-सुरक्षायाः च महत्त्वं सम्यक् जानीतः । तेन प्रोक्तं यत्, प्राविधिक-सहभागिता भारत-जापान-सहयोगस्य महत्त्वपूर्णः आधार-स्तम्भः भविष्यति। एतमेव सङ्कल्पं सफलीकर्तुं द्वाभ्याम् अपि देशाभ्यां कृत्रिम-बुद्धिमत्तायाः क्षेत्रे एकं संयुक्त-वक्तव्यम् प्रकाशितम्।

प्रधानमन्त्रिणा विशेषेण घोषितं यत्, अद्य भारत-जापानयोः मध्ये प्रथम-सह-विकास-परियोजनायै सन्धि-पत्रे हस्ताक्षरं सञ्जातम् ।

जापान-देशस्य प्रधानमन्त्री साने ताकाइची इत्येषा गत-सायङ्काले त्रिदिवसीय-यात्रायाः कृते नवदिल्लीं सम्प्राप्ता। प्रधानमन्त्रिरूपेण ताकाइची-महोदयायाः इयम् प्रथमा आधिकारिकी भारत-यात्रा वर्तते।

---------------------------------------------------

<u>भारत-जापान-प्रधानमन्त्री</u>

प्रधानमन्त्री नरेन्द्र-मोदी अवदत् यत् भारत-जापानयोः पारस्परिक-सम्बन्धाः सर्वथा विशिष्टाः सन्ति, तथा च द्वयोः देशयोः आर्थिक-सहभागिता वैश्विक-पटले साक्षात् साफल्यस्य आदर्शरूपम् अस्ति। अद्य सायङ्काले नवदिल्ल्यां भारत-जापान-संयुक्त-आर्थिक-मञ्चं सम्बोधयन् श्रीमोदी प्रोक्तवान् यत्, यदा जापान-देशस्य प्रविधि-विशेषज्ञता, निवेशश्च भारतस्य तीव्रगत्या सह मिलति तदा समग्रं विश्वं लाभान्वितं भवति। उभाभ्यां पक्षाभ्यां स्वकीयः आर्थिक-सम्बन्धः गतिशीलं गम्भीरं च विधातुं सङ्कल्पः कृतः । अत्रावसरे द्वाभ्यामपि देशाभ्यां आर्थिक-सुरक्षा-कृत्रिमबुद्धिमत्ता-रक्षा-स्वास्थ्यक्षेत्रेषु भविष्योन्मुखाः सन्धयः विहिताः।

वैश्विकार्थव्यवस्थायाः विषये कथयता प्रधानमन्त्रिणा रेखाङ्कितं यत्, वर्तमान-समये समग्रं विश्वं आपूर्ति-शृङ्खला-अवरोधैः व्यापारिक-अनिश्चितितावशात् च ग्रस्तं वर्तते, अत्रान्तरे भारतं विश्वस्य तीव्रगत्या वर्धमाना प्रमुखा अर्थव्यवस्था वर्तते । विगत-वित्तीयवर्षे भारतस्य जीडीपी-

वृद्धिः सप्त-दशमलव-सप्तप्रतिशतम् आसीत्। तेन विशेषेण प्रोक्तं यत्, सर्वकारेण कर-प्रणाल्यां, सुशासने, व्यापार-सुगमतायां च उत्तम-परिष्काराणि कृतानि।

स्वकीय-सम्बोधने जापानस्य प्रधानमन्त्री साने ताकाइची इत्येषा ऊर्जा-सुरक्षां प्रधान-विषयं मन्वाना अवदत् यत्, जापान-देशः पावर एशिया इनिशिएटिव इत्यनेन माध्यमेन मुक्त-पारदर्शी-ऊर्जा-व्यापारं सुदृढं कर्तुं कृतसङ्कल्पः अस्ति। अस्मिन्नेव कार्यक्रमे उभाभ्यां प्रधानमन्त्रिभ्यां हरियाणा-राज्यस्य खरखौदा-स्थिते मारुति-सुजुकी- संस्थायाः चतुर्थस्य वाहन-निर्माण-संयंत्रस्य संयुक्त रूपेण उद्घाटनं कृतम्।

---------------------------------------------------

संयुक्तराष्ट्र-भारतम्

संयुक्तराष्ट्र-महासभायाम् अन्ताराष्ट्रिय-आतंकवादं विरुध्य व्यापक-अभिसमयस्य कृते भारतस्य कश्चन चिरलम्बित-प्रस्तावः समर्थितः । संयुक्तराष्ट्रस्य वैश्विक-आतंकवाद-विरोधी-रणनीतेः नवम-समीक्षायाम् या च चत्त्वारिंशदधिकैकशतं मतैः अङ्गीकृता, तत्र सदस्य-देशाः आदिष्टाः यत् ते विगत-त्रिदशकेभ्यः भारतेन प्रस्तावितस्य अस्य अभिसमयस्य कृते अन्तिम-रूपं प्रदातुं पूर्ण-प्रयत्नान् विदध्युः । संयुक्तराष्ट्रे भारतस्य स्थायी-प्रतिनिधिः पी. हरीशः महासभां सम्बोधयन् अवदत् यत्, कस्यचित् सर्वसम्मत-विधि-तन्त्रस्य अभावात् वैश्विक-आतंकवाद-विरोधी-प्रयासाः दुर्बलाः भवन्ति।

तेन विशेषेण रेखाङ्कितं यत्, आतंकवादस्य निवारणे कोऽपि द्विविध-मानदण्डः न भवेत्, तथा च अस्य दुष्कृत्यस्य अपराधिनः, वित्तपोषकाः, प्रायोजकाश्च अस्त पूर्णतया उत्तरदायित्वेन दण्डनीयाः । सः सबलं प्रोक्तवान् यत् आतंकवादी केवलम् आतंकवादी एव भवति, अतः मिथ्या-तुलनाभिः अथवा राजनैतिक-कथाभिः आतंकवाद-विरोधी-अभियानानि कदापि शिथिलानि न भवेयुः।

---------------------------------------------------

अमरनाथ-जी-यात्रायाः

वार्षिकस्याः श्री-अमरनाथ-जी-यात्रायाः कृते द्वा-विंशत्यधिक-अष्टशतोत्तर-चतुःसहस्र-तीर्थयात्रिणां प्रथमसमूहं जम्मू-नगरस्य भगवतीनगर-यात्रीनिवास-आधारशिबिरात् विस्तृतसुरक्षाव्यवस्थायां हरितध्वजं प्रदर्श्य उपराज्यपालेन मनोजसिन्हावर्येण अद्य प्रेषितम्। देशस्य विभिन्नेभ्यः भागेभ्यः तीर्थयात्रिणः पवित्रयात्रायां भागग्रहणाय जम्मू-नगरम् आगच्छन्तः सन्ति।

---

**<u>वीबी-जी- राम जी</u>**

केन्द्रीय - ग्रामीण - विकास - कृषि - कृषक - कल्याण - मन्त्री शिवराज-सिङ्घ-चौहानः अवदत् यत् विकसित भारत-रोजगारेत्यस्य तथा आजीविका-मिशन् इत्यस्य प्रत्याभूतिः **वी.बी जी राम जी** अधिनियमः, विंशतिः पञ्चविंशतिः आजिविका-सुनिश्चिततायाः, ग्रामीणाजीविकायाः सुदृढीकरणस्य तथा च देशस्य ग्रामाणां विकासस्य गतिं वर्धयितुं प्रमुखं पदक्षेपः अस्तीति। केन्द्रीयमन्त्रिणा शिवराज-सिङ्घ-चौहानेन आन्ध्रप्रदेशस्य मुख्यमन्त्रिणा एन्. चन्द्रबाबु नायडु इत्यनेन सह अद्य आन्ध्रप्रदेशस्य तिरुपति-जनपदस्य मुक्कावारिपल्ले-ग्रामे **वीबी-जी राम जी** अधिनियमस्य आरम्भः कृतः। सभाम् सम्बोधयन् श्रीचौहानः अवदत् यत् न कोपि निर्धनः श्रमिकः कार्यरहितः भवेत् तथा च प्रत्येकस्मिन् हस्तयोः आजिविका भवेत् इति अस्याः योजनायाः लक्ष्यम् अस्ति। सः योजनायाः प्रवर्तनाय प्रधानमन्त्रिणं नरेन्द्रमोदिनं धन्यवादं कृत्वा उक्तवान् यत् कार्यक्रमस्यान्तर्गतं कार्य दिनानि शततः पञ्चविंशत्यधिकैक-शत-दिनानि यावत् वर्धितानि सन्ति।

---

**<u>ऋतुविभागः</u>**

अद्य नैर्ऋत्य-प्रावृट्कालः सम्पूर्णे दिल्ली-नगरे, गुजरातस्य केषुचित् भागेषु, उत्तरप्रदेशस्य शेषभागेषु, मध्यप्रदेशस्य अधिकांशभागेषु, हरियाणा-पञ्जाब्-प्रदेशयोः, राजस्थानस्य केषुचित् भागेषु च अग्रे प्रवर्धितः। राष्ट्रिय-राजधान्यां निम्नवृष्ट्या उष्ण-आर्द्र-स्थित्यां न्यूनताऽगता। ऋतुविभागेन दिने राष्ट्रिय-राजधान्याः अनेकेषु भागेषु वृष्ट्या सह मेघगर्जनस्य मेघाच्छादानस्य च पूर्वानुमानं प्रकटितम् अस्ति। पश्चिम-मध्य-भारतस्य च केषुचित् भागेषु प्रचण्डवृष्ट्यै

पीतवर्णीया सञ्चेतना प्रदत्ता अस्ति। उत्तरप्रदेशे प्रावृट् आगमनेन राज्यस्य निवासिनः वृष्ट्या प्रचण्डोष्णात् अत्यन्तं सौख्यं प्राप्तवन्तः।

---------------------------------------------------

<u>फीफा-विश्वकप्</u>

फीफा-विश्वकप्-क्रीडायां, अमेरिका-देशः द्वयाधिकद्विसहस्रतम वर्षानन्तरं प्रथमवारं नॉकआउट-चरणे विजयं पञ्जीकृतवान्, बोस्निया-हर्जेगोविना-देशौ द्वे-शून्येन पराजितवान्; बेल्जियम्-देशः अपि सेनेगल्-देशस्य उपरि अतिरिक्तसमयस्य विजयेन राउण्ड्-आफ्-16 इत्यस्मिन् प्रविष्टवान्।

।। इति वार्ताः ।।